**दृभ** भये वा चुरा०उभ०पक्षे भ्वा०पर०अक०सेट् । दर्भयति-ते दर्भति । अदीदृभत् त अदर्दर्भत् त । अदर्भीत् दृभित् दृब्धः दृब्धवान् ।

**दृभीक** पु० दृभ—बा० ईकङ् । असुरभेदे "अध्वर्यवो यो दृभीकम्" ऋ० २।१४।३ "दृभीको नामासुरः" भा०

**दृभिचण्डेश्वर** न० मत्स्यपुराणोक्ते शिवलिङ्गभेदे

**दृवन्** त्रि० दृ—विदारे क्वनिप् बा० वेदे ह्रस्वः । विदारके "दृवाणि रक्षांसि क्षुमाणि" यजु०१०।८

**दृश** चाक्षुषज्ञाने भ्वा०पर०सक० अनिट् । पश्यति दृशित् अदर्शत् अद्राक्षीत् । ददर्श ददर्शिथ दद्रष्ठ ददृशिव द्रष्टा दृश्यात् द्रक्ष्यति । दर्शनीयं द्रष्टव्यं दृश्यः द्रष्टा दृष्टः द्रष्टुं दृष्टिः दृक् दृष्ट्वा प्रदृश्य । "ततोऽथ पश्यन् विटपान्तरालाः" भट्टिः पश्यतो हरः । "न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" । "अपश्यद् देवदेवस्य शरीरे पाण्डवस्तदा" गीता "ददर्श दूनः स्थलपद्मिनीं नलः"नैष० मानसज्ञाने च "शान्तोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितोभूत्वा आत्मन्यात्मानं पश्यति" श्रुतिः "आत्मा वा अरे द्रष्टव्यः" वृ०उ० श्रुतिः णमुल् "तं विप्रदर्शं कृतघातयत्ना" भट्टिः "दृशेरनालोचने कङ् च" पा० कर्त्तरि कङ् अन्यादृशः कीदृशः चात् क्विन् कस च अन्यादृक् अन्यादृक्षः । श पश्यः "अपास्य पश्यं निजदृश्यखेटात्" नील०ता० "उग्रम्पश्या-कुलेऽरण्ये" भट्टिः दर्शयति ते अददर्शत् अदीदृशत् त । णिचि कर्मणः कर्तृत्वे तङ् दर्शयते भवो भक्तान् भक्तैर्वा आत्मानमिति शेषः । एवं विषये दृशेः कर्तुर्वा कर्मसंज्ञा "सीतां रामेण चात्मानमदर्शयत लक्ष्मणम्" मुग्धबो० सनि तङ् दिदृक्षते । "दिदृक्षमाणः परितः ससीतं रामं यदा नैक्षत लक्ष्मणश्च" । भट्टिः दिदृक्षा कर्मणि दृश्यते "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" श्रुतिः "जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः" मनुः "अदर्शि सङ्कोच्य कदाप्यवीक्षितः" "रूपमदर्शि धृतोऽसि यदर्थम्" नैष० अस्यार्षे क्वचित्तङपि । "यं यं हि ददृशे सेयं तं तं मेने नलं नृपम्"भा०व०२२०२श्लो०। दर्शनयोग्ये प्रकाशे च अक० "मधुरात्मानमदर्शयत् पुरः" कुमा०। दर्शनार्थत्वे तङ् स्यादिति बोध्यम् ।

अनु+अनुरूपदर्शने "रथे विलग्नाविव चन्द्रसूर्यौ घनान्तरेणानुददर्श लोकः" भा०वि० १६९श्लो० दर्शिशब्दे पात०सूत्रे उदा० दृश्यम् । "बहुविधमनुदृश्य चार्थहेतोः कृपणमिहार्यमनार्यमाश्रयन्तम्" भा०शा० १७९ अ०

अभि+आभिमुख्येन समन्ताद्वा दर्शने "तदा प्रभृति कौन्तेय ! नरा गिरिमिमं सदा । नाशक्नुवन्नभिद्रष्टुं कुत एवाधिरोहितुम्"भा०व०९९८२श्लो०

अव+नीचतया दर्शने "यथा जलस्थ आभासः स्थलस्थेनावदृश्यते । स्वाभासेन यथा सूर्यो जलस्थेन दिवि-स्थितः" भाग० ३।२७।१२

आ+आभिमुख्येन समन्ताद्वा दर्शने आदर्शः । "उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ" रघुः ।

उद्+नीचस्थस्योच्चतया दृष्टौ उत्प्रेक्षणे च

उप+सामीप्येन दर्शने । "चतुष्पाद् व्यवहारोऽयं विवादेषूपदर्शितः" याज्ञ० ।

नि+दृष्टान्ततया साम्मुख्येन वा दर्शने । "द्रष्टुमिच्छामि ते रूपमैश्वरं त्वं निदर्शय" भा०आश्व० १५८८ श्लो० निदर्शनालङ्कारः "निदर्शयामास विशेषदृश्यम्" रघुः

परा+विपरीतदर्शने यस्य यथारूपं ततोऽन्यरूपेण दर्शने "धूममग्निं परादृश्य मित्राद्भूतस्त्वा दधतां भयम्" अथ० ८।८।२। "त्रीन् स्तनानुमेयुस्तं परादृशुः । द्वौ स्तना उपेयुस्तन्नेदीयसः परादृशुः" शत० ब्रा० ६।५।१।२।४।

परि+परितः समन्ताद्वा दर्शने "परिदृष्टानि तीर्थानि गङ्गा-चैव मया नृप !" भा०आश्व०७२अ० परिच्छिन्नतया दर्शने च । "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः" पा०सू० । दीर्घसूक्ष्मशब्दे ३६१४पृ० दृश्यम् ।

प्र+सम्यग्दर्शने "मनसैव प्रदीपेन महानात्मा प्रदृश्यते" भा०आश्व० १९अ० "अहो त्वयाद्य विप्रेषु भक्तिरागः प्रदर्शितः" भा०अनु० ७२११श्लो० एकदेशदर्शने च । प्रदर्शनार्थमिदमुक्तम् । "योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम्" भा०आ०५१० श्लो०।

प्रति+तुल्यरूपदर्शने "क्षताभ्यङ्गः शोणितेन रुद्रवत् प्रत्यदृश्यत" भा०भी० ४६७९श्लो० "निमित्तलक्षणं ज्ञानं शाकुनं स्वप्नदर्शनम् । अवश्यं सुखदुःखेषु नराणां प्रतिदृश्यते" रामा०अयो० ५८१५श्लो०

वि+विशेषेण दर्शने "विदर्शयन्तोविविधान् भूयश्चित्रांश्च निर्झरान्" रामा०अयो० ४८अ० १२श्लो०

सम्+सम्यग्दर्शने "संद्रक्ष्यन्ति नराश्चान्ये स्वरूपेण विनाशनम्" भा०शा० १०६८ श्लो०